# Shridharasvamipratahsmaranam

# શ્રીધરસ્વામીપ્રાતઃસ્મરણમ્

## Document Information

Text title : Shridharasvami Pratahsmaranam

File name : shrIdharasvAmIprAtaHsmaraNam.itx

Category : deities_misc, gurudev, shrIdharasvAmI, suprabhAta

Location : doc_deities_misc

Author : sachchidAnanda avadhUta svAmI

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# શ્રીધરસ્વામીપ્રાતઃસ્મરણમ્

શ્રીશ્રીધર નિત્યોપાસના

॥ શ્રી શ્રીધરાય નમઃ ॥

નમઃ શાન્તાય દિવ્યાય સત્યધર્મસ્વરૂપિણે ।
સ્વાનન્દામૃતતૃપ્તાય શ્રીધરાય નમો નમઃ ॥

પ્રાતઃસ્મરામિ ગુરુનાથ મુખારવિન્દં
    મન્દસ્મિતં મધુરભાષિ વિશાલભાલમ્ ।
ચિદ્વલ્કલામ્બરધરં પરમેકસત્યં
    વેદાન્તબોધમભયં નયનાભિરામમ્ ॥ ૧॥

પ્રાતર્નમામિ ગુરુદેવમનન્તમાદ્યં
    સદ્ભક્તવૃન્દસુખદં વરદાનદક્ષમ્ ।
યન્નામકીર્તનપરાજિતદુઃખદોષં
    સંસારસિન્ધુતરણામલપોતપાદમ્ ॥ ૨॥

પ્રાતર્નમામિ ગુરુનાથપદારવિન્દં
    ગન્ધાક્ષતાતુલસિપુષ્પસુશોભમાનમ્ ।
બ્રહ્માદિયોગિમુનિવૃન્દસુસેવ્યમાનં
    ધ્યેયં સમસ્તજગતાં ભવમુક્તિહેતુમ્ ॥ ૩॥

પ્રાતર્વદામિ વચસા ગુરુનામનામ
    અજ્ઞાનદોષસકલં શમલં નિહન્તિ ।
વેદાન્તવેદ્યસુજનૈરુપગીયમાનં
    સચ્ચિત્સુખં પરમમઙ્ગલદિવ્યનામ ॥ ૪॥

પ્રાતઃશ્રયે શ્રુતિનુતાં ગુરુમાત્વતત્ત્વં
    મોક્ષશ્રિયં વિધૃત-શ્રીધરનામવાચ્યમ્ ।
નામાદિભેદરહિતં નિજમાત્મરૂપં

તત્ત્વં વિભાતુ હૃદયે ન પરં વિકાઙ્ક્ષે ॥ ૫॥

યઃ શ્લોકપઞ્ચકમિદં પ્રયતઃ પઠેદ્ધિ
નિત્યં પ્રભાતસમયે ગુરુમેકભક્ત્યા ।
બ્રહ્મૈવશાશ્વતમહં ન ચ વસ્તુજાતં
મત્વા ન શોચતિ ગુરું શરણં પ્રપન્નઃ ॥ ૬॥

આનન્દકન્દં કરુણાનિધાનં
સંસારમાયામતિમોહદૂરમ્ ।
સદા વસન્તં હૃદયારવિન્દે
ગુરું વરેણ્યં સતતં નમામિ ॥ ૭॥

ઇતિ શ્રીમત્ પ. પ. સચ્ચિદાનન્દ અવધૂત સ્વામીવિરચિતં
શ્રીધરસ્વામીગુરુપ્રાતઃસ્મરણં સમ્પૂર્ણમ્ ।

Proofread by Paresh Panditrao

*Shridharasvamipratahsmaranam*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*